Title: महाभारते अनुस्मृतिः

Author:

Extent: २ Age:

Subject: महाभारत (शां. प. (कोशः))

महाभारते मनुस्मृतिः

१०३२

३ पत्रे

श्रीगणेशायनमः ॐनमोभगवतेवासुदेवाय शतानीकोवाच महातेजोमहाप्राज्ञस
र्वशास्त्रविशारद अक्षीणकर्मबंधस्तुपुरुषोद्विजसत्तम १ मरणेयज्जपेज्जाप्यंयंचभाव
मनुस्मरन् परमंपदमाप्नोतितन्मेब्रूहिसुनिश्चितं २ शौनकोवाच श्रीवत्सांकंजग
द्बीजमनंतंलोकसाक्षिणं पुरानारायणंदेवंनारदःपर्यपृच्छत ३ नारदोवाच भगवन्
भूतभव्येशाश्वद्ध्यानैर्जितेंद्रियैः कथंभक्तैर्विचिंत्योसिमरणेपर्युपस्थिते ४ किंवा
नित्यंजपेज्जाप्यंतस्यादुत्थायमानवः स्नातोविशुद्धोध्यायेत्तन्मेब्रूहिसनातन ५ श्रु
त्वातस्यतुदेवर्षेर्वाक्यंवाक्यविशारदः प्रोवाचभगवान्विष्णुर्नारदंजगतांपतिः ६॥
श्रीभगवानोवाच हंततेकथयिष्यामिमुनेर्दिव्यामनुस्मृतिं मरणेयामनुस्मृत्यप्राप्नो
तिपरमांगतिं ७ ओंकारमादितःकृत्वामामनुस्मृत्यचात्मनः एकाग्रःप्रयतोभूत्वा
त्विमंमंत्रमुदीरयेत् ८ ॐनमोभगवतेवासुदेवाय अनंतंशाश्वतंदेवमव्यक्तंपुरु
षोत्तमं प्रपद्येप्रांजलिर्विष्णुमच्युतंपरमेश्वरं ९ पुराणंपुरुषंविष्णुमनंतंलोकसा
क्षिणं प्रपद्येपुंडरीकाक्षमीशंभक्तानुकंपिनं १० लोकनाथंसहस्राक्षमक्षरंपरमंप
दं भगवंतंप्रपन्नोस्मिभूतभव्यभवत्प्रभुं ११ स्रष्टारंसर्वलोकानामनंतबलपौरुषं।
पद्मनाभंहृषीकेशंप्रपद्येसत्यमव्ययं १२ हिरण्यगर्भंभूगर्भममृतंविश्वतोमुखं प्र
भाकरमनाद्यंतंप्रपद्येभास्करद्युतिं १३ सहस्रशिरसंदेवंवैकुंठंतार्क्ष्यमेवच प्रपद्ये
सूक्ष्ममचलंवरेण्यमभयप्रदं १४ नारायणंनारसिंहंयोगात्मानंसनातनं शरण्यं

सर्वभूतानांप्रपद्येकृष्णमीश्वरं १५ अव्यक्ताद्व्यक्तमुत्पन्नमव्यक्ताद्यःपरःप्रभुः तस्मात्पर
तरंनास्तितमस्मिञ्शरणंगतः १६ चिंतयंतोहियंनित्यंब्रह्मेशानादयःप्रभुं निश्चयंनाभि
गच्छंतितमस्मिञ्शरणंगतः १७ जितेंद्रियामहात्मानोज्ञानध्यानपरायणाः यंप्राप्यननि
वर्त्ततेतमस्मिञ्शरणंगतः १८ यःप्रभुःसर्वभूतानांयेनसर्वमिदंततं चराचरगुरुर्देवःस
मेविष्णुःप्रसीदतु १९ एकांशेनजगत्सर्वंयोवष्टभ्यस्थितोविभुः अग्राह्योनिर्गुणःआ
त्मातमस्मिञ्शरणंगतः २० यस्माज्जातःपुराब्रह्माद्यपद्मयोनिपितामहः प्रसीदतुसमे
विष्णुःपितामहपरःप्रभुः २१ यःपुराप्रलयेप्राप्तेनष्टेलोकेचराचरे एकस्तिष्ठतियोगात्मा
समेविष्णुःप्रसीदतु २२ पर्जन्यःपृथिवीसस्यंकामोधर्मःक्रियाफलं गुणाकारःप्रभु
रीशोवासुदेवःप्रसीदतु २३ अग्निसोमार्कताराणांब्रह्मरुद्रेंद्रयोगिनां स्वस्तिस्तुर्यस्यते
जांसिसमेविष्णुःप्रसीदतु २४ चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच हूयतेचपुनर्द्वा
भ्यांतस्मैयज्ञात्मनेनमः २५ दिवाकरस्यसौम्यंहिमध्येयंचव्यवस्थितं क्षेत्रज्ञमिति
यंप्राहुःसमहात्माप्रसीदतु २६ अथयस्मिन्महात्माचदुर्विज्ञेयःसनातनः आस्थि
तःप्रकृतिंभुंक्तेसमहात्माप्रसीदतु २७ क्षेत्रज्ञंपंचधाभुंक्तेप्रकृतिंबहुधागुणैः मनो
गुणांश्चयोभुंक्तेसमहात्माप्रसीदतु २८ सांख्ययोगश्चयोगात्मासाध्याश्चैवमहर्षयः
यंविदित्वाविमुच्यंतेसमहात्माप्रसीदतु २९ शमीगर्भस्ययोगर्भस्तस्यगर्भस्ययोरिपुः
रिपुगर्भस्ययोगर्भसमेविष्णुःप्रसीदतु ३० यस्यहस्तेगदाचक्रंगरुडोयस्यवाहनं ॥ १

यज्ञगर्भमहाभागपंचयज्ञनमोस्तुते॥ चतुर्मूर्तिजगद्धामलक्ष्मीवासवरप्रद ५

शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु ३१ चतुर्मूर्तिपरंधामलक्ष्मीवासोचितार्चितः सर्वा
धिवासनान्योसिवासुदेवनमोस्तुते ३२ योगावासनमस्तुभ्यंसर्वावासवरप्रदं सर्वावास
नमस्तेस्तुसाक्षिभूतजगत्पते ३३ अजेयःखंडपरशुर्विष्णुमूर्तिर्वृषाकपिः त्रिगुणोपंच
कालायनमस्तेज्ञानसागर ३४ नमस्तेसर्वतोभद्रसर्वतोक्षिशिरोमुख निर्विकारनम
स्तेस्तुसाक्षिभूतोव्ययस्थितेः ३५ अतींद्रियनमस्तुभ्यंलिंगेस्त्वमनुमीयते येतुभ्यंना।
भिजानातिसंसारेसंसरंतिते ३६ नमस्तेपुंडरीकाक्षपुनरेवनमोस्तुते ईश्वरोसिजग
न्नाथकिमतःपरमुच्यते ३७ रागद्वेषविनिर्मुक्तोलोभमोहविवर्जितः अशरीरःश
रीरस्थसमःसर्वेषुदेहिषु ३८ अव्यक्तंबुद्ध्यहंकारमात्राभूतेंद्रियाणिच त्वयितानि
नतेषुत्वंतेषुत्वंतानिनत्वयि ३९ स्रष्टाभोक्तासिकूटस्थोगुणानांप्रभुरीश्वरः प्रकृ
त्याहेतुरहितःप्रभुरात्माव्यवस्थितः ४० भक्तानांयोहिदेवस्त्वंत्वंधामास्त्वनरोत्तम॥
समोभूतेषुसंयोगोनपुनर्भवजन्मनि ४१ नाहंकारेणबोध्योहितथासत्वादिनिर्गुणैः
नधर्मोनत्वधर्मोवानपुनर्भवजन्मनि ४२ विषयैरिंद्रियैश्चैवमामेभूयात्समागमः
पृथिवींघातुमेघ्राणंपातुमेरसनाजलं ४३ चक्षुर्तेजात्रानंपातुस्पर्शोमेयातुमारुतं।
शब्दोत्याकाशमभ्येतुचंद्रेवैकारिकंमनः ४४ अहंकारश्चमेबुद्धिंत्वयिबुद्धिःसमेतु
च वियोगःसर्वकारणगुणैर्भूतैश्चमेभवेत् ४५ सत्वंरजस्तमश्चैवप्रकृतिंप्रविशं
तुमे साकेवलपदंदेवीप्रयातुपरमंतव ४६ एकभावोभूतोवास्तुमामेजन्मभवेत्पुनः॥

अ.स्मृ. नमोभगवतेतस्मैविष्णवेप्रभविष्णवे ४७ त्वन्मनास्त्वद्गतप्राणास्त्वद्भक्तस्त्वत्परायणाः
२ त्वामेवानुस्मरन्तित्वं मरणेपर्युपासते ४८ पूर्वदेहकृतायेमेव्याधयस्तेविशन्तुमां
२ मद्दियंतुचदुःखानि ऋणमेप्रतिमुच्यतां ४९ विनष्टायांतुमेरोगायेमयापूर्वसंचिताः
अरुणोगंतुमिच्छामितद्विष्णोःपरमंपदं ५० कर्मेंद्रियाणिसंयम्यपंचबुद्धींद्रियाणिच
दशेंद्रियाणिमनसिसहंकारेतथात्मनः ५१ अहंकारंतथाबुद्धौबुद्धिंचात्मनियोजयेत्।
जितबुद्धींद्रियःपश्येद्बुद्ध्याबुद्धेःपरात्परं ५२ मायायस्येतितस्याहंयेनसर्वमिदंततं आ
त्मनात्मनिसंयोज्यपरमात्मानमव्ययं ५३ ततोबुद्धेःपरंबुध्वालभतेनपुनर्भवं नमोभ
गवतेतस्मैयेनसर्वमिदंततं ५४ अहंभगवतस्तस्यममवासौसुरेश्वरः तस्याहंनप्र
णश्यामिसचमेनप्रणश्यति ५५ इमामनुस्मृतिंदिव्यांवैष्णवींपापनाशिनीं स्वप्नेवि
बुद्ध्वपठन्त्रिसंध्येवापियःस्मरेत् ५६ अपिपापसमाचारःसोपियातिपरंपदं म
रणेवापिसंप्राप्तेयदिमामनुस्मरेत् ५७ यदहंकारमाश्रित्ययज्ञदानतपःक्रियाः।
कुर्वन्फलमवाप्नोतिपुनरावर्तनंपतः ५८ अर्चयन्नपियोदेवान्नाहेवापिबलिंददत् जु
ह्वन्वदन्स्मरेद्वापिलभतेपरमांगतिं ५९ यज्ञदानंतपस्तस्मात्कुर्योदाशाविवर्जितः पूर्णि
मायाममायायब्रह्मद्वादश्यांवाविशेषतः ६० भावयेतश्रद्दधानेभ्योयेचान्येमामुपाश्रिताः।
नमस्त्वेवयोब्रूयान्मद्भक्तःश्रद्धयान्वितः ६१ तस्याक्षयोभवेत्लोकाःश्वपाकस्यापिनार
द। किंपुनर्यजतेयोमांसाधकोविधिपूर्वकं ६२ अश्वमेधसहस्राणांयःसहस्रंसमाचरेत्। २

नासौतत्फलमाप्नोतिमद्भक्त्यायदवाप्नुयात् ६३ एवंदत्तंतपोधीतंव्रतानिनियमाश्चये सर्वंमे
तद्विनाशायज्ञानंशांतिनविद्यते ६४ तस्मात्सदैयासाधुभ्यःसर्वसत्त्वाभयंकरी कृत्स्ना
चपृथिवीदद्यान्नतत्तुल्यंकदाचनः ६५ कांतारेवनदुर्गेषुकृत्स्नेचभयसंभवे दस्युभिःसं
निरुद्धस्तुनाममिमंप्रकीर्तयेत् ६६ जलेरक्षतुवाराहःस्थलेरक्षतुवामनः अटव्यांना
रसिंहस्तुसर्वतःपातुकेशवः ६७ सकृदुच्चारितंयेनहरिरित्यक्षरद्वयं बद्धःपरिकरस्ते
नमोक्षायगमनंप्रति ६८ तस्मात्त्वमेवदेवर्षेध्यायंस्वांतंद्विजोहरिं अवाप्स्यसिततः
सिद्धिंपरंद्रक्ष्यसितत्पदं ६९ नाहंवसामिवैकुंठेयोगिनांहृदयेनच मद्भक्तायत्रगा
यंतितत्रतिष्ठामिनारद ७० वैशंपायनउवाच एवंसदेवदेवेननारदःप्रतिबोधितः
चकारकेशवेभक्तिंतस्मात्त्वंकुरुभूपते ७१ संसारएवसीमंतोयःस्वानांकिलक
प्यते नतुध्यायतियोदेहेकथयामिचतत्पदं ७२ सनामध्यायतेनित्यंसर्वेयाति
परांगतिं सर्वबंधविनिर्मुक्तःपरंपदमवाप्नुयात् ७३ इतिश्रीमहाभारतेशतसह
स्रसंहितायांवैयासिक्यांशांतिपर्वणिअनुस्मृतिसमाप्ता शुभंभवतु श्रीरस्तु॥

3